# दृग्दृश्य विवेकः

रूपंदृश्यं लोचनं दृक् ,  तद् दृश्यम् दृक् तु  मानसं।

दृश्याधीवृत्तयः साक्षी, दृक्  एव न तु दृश्यते॥१॥

rūpaṁ dṛśyaṁ locanaṁ  dṛk, tad dṛśyaṁ dṛktu mānasaṁ |

dṛśyā dhīvṛttayaḥ sākṣī, dṛk eva na tu dṛśyate||1||

नीलपीत  स्थूलसूक्ष्म् ह्रस्व दीर्घादि भेदतः |

नानाविधानि रूपाणि पश्ये ल्लोचनमेकधा॥२॥

nīlapītasthulasūakṣm hrasva dīrgh ādī bhedataḥ |

nānāvidhāni rūpāṇi paśye locanam ekadhā ||2||

आन्ध्यमान्द्यपटुत्वेषु नेत्रधर्मेषु चैकधा।

संकल्पयेन्मनःश्रोत्र त्वगादौ योग्यतामिदम्॥३॥

Āndhyamāndyapaṭutveṣu  netradharmeṣu caikadhā |

saṁkalpayenmanaḥ śrotra tvagādau yogyatāmidam

कामःसंकल्प संदेहौ, श्रद्धाश्रद्धे धृतितरे।

ह्रीधीर्भिर् इत्येवमादिन्, भासयत्येकधा चितिः॥४॥

kāmaḥ saṁkalpasaṁdehau, śraddhāśraddhe dhṛtitare |

hrīr dhīr bhir ityevam ādin,  bhāsyet yekadhā citiḥ ||4||

नोदेति नास्तमेत्येषा न वृद्धिं याति न क्षयम्।

स्वयं विभात्यथान्यानि भासयेत्साधनं विना॥५॥

nodeti nāstam-etyeṣā na vṛddhiṁ yāti na kṣayam|

svayaṁ vibhātyathānyāni bhāsayetsādhanaṁ vinā ||5||

चिच्छायावेशतो बुधौ भानं धीस्तु द्विधा स्थिता।

एकाहंकृतिरन्या स्याद अंतःकरणरूपिणी॥६॥

cicchāyāveśato budhau bhānaṁ dhīstu dvidhā sthitā |

ekāhaṁkṛtiranyā syād -aṁtaḥkaraṇarūpiṇī ||6||

छायाहंकारयोरैक्यं तप्तायःपिंडवन्मतं।

तदहंकार तादात्म्याद् देहश्चेतनतां अगात्।॥७॥

chāyāhaṁkārayoraikyaṁ taptāyaḥpiṁḍavanmataṁ|

tadahaṁkāra tādātmyād dehaścetanatāṁ agāt ||7||

# दृग्दृश्य विवेकः

अहंकारस्य तादात्म्यं चिच्छायादेहसाक्षिभिः।

सहजं कर्मजं भ्रान्तिजन्यं च त्रिविधं क्रमात्॥८॥

ahaṁkārasya tādātmyaṁ cicchāyādehasākṣibhiḥ|

sahajaṁ karmajaṁ bhrāntijanyaṁ ca trividhaṁ kramāt||8||

संबंधिनोस्सतोर्नास्ति निवृत्तिस्सहजस्य तु।

कर्मक्षयात् प्रबोधाच्च निवर्तेते क्रमादुभे॥९॥

saṁbaṁdhinossatornāsti nivṛttissahajasya tu|

karmakṣayāt prabodhācca nivarteete kramādubhe||9||

# दृग्दृश्य विवेकः

अहंकारलये सुप्तौ भवेद्देहोऽप्यचेतनः

अहंकार विकासार्धः स्वप्नः सर्वस्तु जागरः॥१०॥

ahaṁkāralaye suptau bhaveddeho'pyacetanaḥ

ahaṁkāra vikāsārdhaḥ svapnaḥ sarvastu jāgaraḥ||10||

अंतःकरणवृत्तिश्च चितिच्छायैक्यमागता।

वासनाः कल्पयेत् स्वप्ने बोधेऽक्षैर्विषयान् बहिः॥११॥

aṁtaḥkaraṇavṛttiśca citicchāyaikyamāgatā|

vāsanāḥ kalpayet svapne bodhe'kṣairviṣayān bahiḥ ||11||

मनोऽहंकृत्युपादानं लिंगमेकं जडात्मकं।

अवस्थात्रयमन्वेति जायते म्रियते तथा॥१२॥

mano'haṁkṛtyupādānaṁ liṁgamekaṁ jaḍātmakaṁ |

avasthātrayamanveti jāyate mriyate tathā ||12||

शक्तिद्वयं हि मायाया विक्षेपावृतिरूपकं।

विक्षेपशक्तिर्लिंगादि ब्रह्माण्डांतं जगत्सृजेत्॥१३॥

śaktidvayaṁ hi māyāyā vikṣepāvṛtirūpakaṁ|

vikṣepaśaktirliṁgādi brahmāṇḍāṁtaṁ jagatsṛjet||13||

# दृग्दृश्य विवेकः

सृष्टिर्नाम ब्रह्मरुपे सच्चिदानंदवस्तुनि।

अब्धौ फेनादिवत्सर्व नामरुप प्रसारणा॥१४॥

sṛṣṭirnāma brahmarupe saccidānaṁdavastuni|

abdhau phenādivatsarva nāmarupa prasāraṇā||14||

अंतर्द्दृग्दृश्ययोर्भेदं बहिश्च ब्रह्म सर्गयोः।

आवृणोत्यपरा शक्तिस्सा संसारस्य कारणम्॥१५॥

aṁtarddṛgdṛśyayorbhedaṁ bahiśca brahma sargayoḥ|

āvṛṇotyaparā śaktissā saṁsārasya kāraṇam||15||

साक्षिणः पुरतो भाति लिंगं देहेन संयुतम्।
चितिच्छाया समावेशाज्जीवस्याद् व्यावहारिकः॥१६॥
sākṣiṇaḥ purato bhāti liṁgaṁ dehena saṁyutam|
citicchāyā samāveśājjīvasyād vyāvahārikaḥ||16||

अस्य जीवत्मारोपात् साक्षिण्यप्यवभासते।
आवृतौ तु विनिष्टायां भेदे भातेऽपयाति तत्॥१७॥
asya jīvatmāropāt sākṣiṇyapyavabhāsate|
āvṛtau tu viniṣṭāyāṁ bhede bhāte'payāti tat||17||

तथा सर्गब्रह्मणोश्च भेदमावृत्य तिष्ठति।
या शक्तिस्तद्वशाद्ब्रह्म विकृतत्वेन भासते॥१८॥
tathā sargabrahmaṇośca bhedamāvṛtya tiṣṭhati|
yā śaktistadvaśādbrahma vikṛtatvena bhāsate||18||

## Verse 19

अत्राप्यावृतिनाशेन विभाति ब्रह्मसर्गयोः।
भेदस्तयोर्विकार: स्यात् सर्गे न ब्रह्मणि क्वचित्।॥१९॥

atrāpyāvṛtināśena vibhāti brahmasargayoḥ |

bhedastayorvikārah syāt sarge na brahmani kvacit ||19||

## Verse 20

अस्तिभाति प्रियं रुपं नाम च इति अंश पंचकम्।

आद्यत्रयं ब्रह्मरूपं जगद्रूपं ततोद्वयम्॥२०॥

asti bhāti priyaṁ rūpaṁ nāmacetyaṁśapañcakam |

ādyatrayaṁ brahmarūpaṁ jagadrūpaṁ tato dvayam ||20||

## Verse 21

खवाय्वग्निजलोर्विषु देवतिर्यङ्नरादिषु।

अभिन्नास्सच्चिदानंदाः भिद्येते रूपनामनी॥२१॥

khavāyvagnijalorviṣu devatiryaṅnarādiṣu |

abhinnāssaccidānaṁdāḥ bhidyete rūpanāmanī ||21||

## Verse 22

उपेक्ष्य नामरूपे द्वे सच्चिदानंदतत्परः।

समाधिं सर्वदा हृदये वाऽथवाबहिः॥२२॥

upekṣya nāmarūpe dve saccidānaṁdatatparaḥ |

samādhiṁ sarvadā kuryāt hradaye vā'thavā bahiḥ ||22||

## Verse 23

सविकल्पो निर्विकल्पः समाधिर्द्विविधो हृदि।

दृश्यशब्धानुवेधेन सविकल्पः पुनर्द्विधा।२३॥

savikalpo nirvikalpaḥ samādhirdvividho hradi |

dṛśyaśabdhānuvedhena savikalpaḥ punardvidhā |23||

## Verse 24

कामाद्याश्चित्तगादृश्या तत्साक्षित्वेनःचेतनम्।

ध्यायेद्दृश्यानुविद्धोऽयं समाधिस्सविकल्पकः॥२४॥

kāmādyāścittagā dṝśyā tatsākṣitvenaḥ cetanam |

dhyāyed dṛśyānuviddho'yaṁ samādhissavikalpakaḥ ||24||

## Verse 25

असंगस्सच्चिनानंदःस्वप्रभोद्वैतवर्जितः।

अस्मीति शब्धविद्धोऽयं समाधिस्सविकल्पकः॥२५॥

asaṁgassaccinānaṁdaḥ svaprabho dvaitavarjitaḥ |

asmīti śabdhaviddho'yaṁ samādhissavikalpakaḥ||25||

## Verse 26

स्वानुभूतिरसावेशाद्दृश्यशब्धावुपेक्ष्यतु।

निर्विकल्पस्समाधिस्यात्निवातस्थितदीपवत्॥२६॥

svānubhūtirasāveśād dṛśyaśabdhāvupekṣyatu |

nirvikalpassamādhisyāt nivātasthitadīpavat ||26||

## Verse 27

ह्रदीवबाह्यदेशेऽपियस्मीन्कस्मींश्चवस्तुनि।

समाधिराद्यस्सन्मात्रात्नामरूपपृथक्कृतिः॥२७॥

hradīva bāhyadeśe'pi yasmīnkasmīṁśca vastuni |

samādhirādyassanmātrāt  nāmarūpapṛthakkṛtiḥ||27||

## Verse 28

अखंडैकरसंवस्तुसच्चिदानन्दलक्षणम्।

इत्यविच्छिन्नचिंतेयंसमाधिर्मद्यमोभवेत्॥२८॥

akhaṁḍaikarasaṁ vastu saccidānandalakṣaṇam |

ityavicchinnaciṁteyaṁ samādhirmadyamo bhavet ||28||

## verse 29

स्तब्धिभावोरसास्वादात्तृतीयःपूर्ववन्मतः।

एतैस्समाधिभिष्षड्भिनयेत्कालंनिरंतरम्॥२९॥

stabdhibhāvo rasāsvādāt tṛtīyaḥ pūrvavanmataḥ |

etaissamādhibhiṣṣaḍbhi nayetkālaṁ niraṁtaram||29||

## Verse 30

देहाभिमाने गलिते विज्ञाते परमत्मनि।

यत्र यत्र मनो याति तत्र तत्र समाधयः।३०॥

dehābhimāne galite vijñāte paramatmani|

yatra yatra mano yāti tatra tatra samādhayaḥ |30||

## Verse 31

भिद्यतेहृदयग्रंथिःछिद्यंतेसर्वशंशयाः।

क्षियंतेचास्यकर्माणितस्मिन्दृष्टेपरावरे॥३१॥

bhidyate hradayagraṁthiḥ chidyaṁte sarva śaṁśayāḥ |

kṣiyaṁte cāsyakarmāṇi tasmindṛṣṭe parāvare ||31||

## Verse 32

अवच्छिन्नश्चिदाभासःतृतीयःस्वप्नकल्पितः।

विज्ञेस्त्रिविधोजीवःतत्राद्यःपारमार्थिकः॥३२॥

avacchinnaścidābhāsaḥ tṛtīyaḥ svapnakalpitaḥ |

vijñestrividhojīvaḥ tatrādyaḥ pāramārthikaḥ ||32||

## verse 33

अवच्छेदःकल्पितस्स्याद् अवच्छेद्यं-तु-वास्तवम्।

तस्मिन्जीवत्वमारोपात् ब्रह्मत्वं तु स्वाभवतः॥३३॥

avacchedaḥ kalpitassyād avacchedyaṁ tu vāstavam |

tasminjīvatvamāropāt brahmatvaṁ tu svābhavataḥ ||33||

## Verse 34

अवच्छिन्नस्य-जीवस्य-पूर्णेन-ब्रह्मणैकताम्।

तत्वमस्य- आदिवाक्यानि जगुर्नेतरजीवयोः॥३४॥

avacchinnasya jīvasya pūrṇena brahmaṇaikatām|

tattvamasyādivākyāni jagurnetarajīvayoḥ ||34||

Verse 35

ब्रह्मण्यवस्थिता-माया=विक्षेपावृत्ति-रूपिणी।

आवृत्याखणडतां-तस्मिन्जगज्जीवौ-प्रकल्पयेत्॥३५॥

brahmaṇyavasthitā māyā vikṣepāvṛttirūpiṇī |

āvṛtyākhaṇaḍatāṁ tasmin jagajjīvau prakalpayet ||35||

Verse 36

जीवोधीस्थ-चिदाभासःभवेद्भोक्ता-हि-कर्मकृत्।

भोग्यरूपमिदं-सर्वं-जगद्स्याद् भूतभौतिकम्॥३६।

jīvo dhīsthacidābhāsaḥ bhavedbhoktā hi karmakṛt |

bhogyarūpamidaṁ sarvaṁ jagadsyādbhūtabhautikam ||36|

verse 37

अनादिकालमारभ्य-मोक्षात्पूर्वमिदं द्वयम्।

व्यवहारेस्थितं तस्माद् उभयं व्यवहारिकम्॥३७॥

anādikālamārabhya mokṣātpūrvamidaṁ dvayam |

vyavahāre sthitaṁ tasmād ubhayaṁ vyavahārikam ||37||||

verse 38

चिदाभासस्थिता निद्रा विक्षेपा वृतिरूणि।

आवृत्यजीवजगतीपुर्वे नूत्नेतुकल्पयेत्॥३८॥

cidābhāsasthitā nidrā vikṣepāvṛtirūiṇi |

āvṛtya jīvajagatī purve nūtne tu kalpayet ||38||

Verse 39

प्रतीत कालएवैते  स्तिथतत्वात् प्रातितिभासिके।

नहिस्वप्न प्रबुद्धस्य पुनस्स्वप्न स्थितिस्तयोः॥३९॥

pratītakāla evaite sithatatvāt prātibhāsike |

na hi svapnaprabuddhasya punassvapne sthitistayoḥ ||39||

Verse 40

प्रातिभासिकजिवो यः तज्जगत् प्रातिभासिकम्।

वास्तवंमन्यते अन्यस्तु मिथेति व्यावहारिकः॥४०॥

prātibhāsikajivo yaḥ tajjagatprātibhāsiakam |

vāstavaṁ manyate anyastu mitheti vyāvahārikaḥ ||40||

Verse 41

व्यावहारिकजिवो यः तज्जगत् व्यवहारिकम्।

सत्यम्प्रत्येति मिथ्येति मन्यते पारमार्थिकः॥४१॥

vyāvahārikajivo yaḥ tajjagat vyāvahārikam |

satyam pratyeti mithyeti manyate  pāramārthikaḥ ||41||

Verse 42

पारमार्थिकजिवस्तु ब्रह्मैक्यं पारमार्थिकम्।

प्रत्येति वीक्षते नान्यत् वीक्षते तु अनृतात्मना॥४२॥

pāramārthikajivastu brahmaikyaṁ pāramārthikam |

pratyeti vīkṣate nānyat vīkṣate tu anṛtātmanā ||42||

माधुर्यद्रवशैत्यानि नीरधर्मास्तरङ्गकेः।

अनुगम्याथ तन्निष्ठे फेनेऽप्यनुगतायथा॥४३॥

mādhuryadravaśaityāni nīradharmāstaraṅgakeḥ |

anugamyātha tanniṣṭhe phene'pyanugatā yathā ||43||

साक्षिस्थास्सच्चिदानन्दाःसम्बंधाद् व्यहारिके।

तद्द्वारेणानुगच्छंति तथैव प्रातिभासिके॥४४॥

sākṣisthāssaccidānandāḥ sambaṁdhād vyāvahārike |

tad dvāreṇānugacchaṁti tathaiva prātibhāsike ||44||

लये फेनस्य तद्धर्मा  द्रवाद्यास्स्यु तरङ्गके।

तस्यापि विलये नीरे तिष्ठंत्येते यथा पुरा॥४५॥

laye phenasya taddharmā  dravādyāssyu taraṅgake |

tasyāpi vilaye nīre tiṣṭhaṁtyete yathā purā ||45||

प्राति भासिकजीवस्य लये स्युर्व्यावहारिके।

तल्लये सच्चिदानन्दाः पर्यवस्यंति साक्षिणि॥४६॥

prātibhāsikajīvasya laye syurvyāvahārike |

tallaye saccidānandāḥ paryavasyaṁti sākṣiṇi ||46

ॐ तत् सत्